

# Pitru Stuti – Brihad Dharma Puranam

## ॥ पितृ स्तुतिः - बृहद् धर्म पुराणम् ॥

The following is a rare hymn on **Pitrus** by **Lord Brahma** and appears in **Chapter 2** of **Brihad Dharma Puranam**.

**Lord Brahma** declares that one should chant this stotram every day morning, the days of **Shraddha** for **Pitrus** and one's own birthdays. This could also be chanted in front of one's father as an obeisance to him. One who does so never faces any misfortune. Even if one has done all sorts of bad deeds, the mere chanting of this hymn will measure upto a **Prayashchitta** (atonement) and will please Pitrus to bestow all comforts and wealth.

This is followed by **Sage Vyasa's Matru Stotram** describing the greatness of Matru and 21 sacred names of mother (not included here). In this hymn, **Sage Vyasa** declares that a mother is greater than father for she takes care of the baby in the womb during **Garbha**. There is no greater **Guru** in all the worlds than mother in the same way as there is no holier water than **Ganga**, greater **Prabhu** (Lord) than **Vishnu**, greater **Pujaniya** (venerable) Lord than **Lord Shambhu** (**Lord Shiva**), greater **Vrata** than **Ekadashi**, etc.

ब्रह्मोवाच -

ॐ नमः पित्रे जन्म दात्रे सर्व देव मयाय च ।
सुखदाय प्रसन्नाय सुप्रीताय महात्मने ॥ १ ॥

सर्व यज्ञ स्वरूपाय स्वर्गाय परमेष्ठिने ।
सर्व तीर्थावलोकाय करुणा सागराय च ॥ २ ॥

नमः सदा ऽ शुतोषाय शिव रूपाय ते नमः ।
सदा ऽ पराध क्षमिणे सुखाय सुखदाय च ॥ ३ ॥

दुर्लभं मानुषमिदं येन लब्धं मया वपुः ।
संभावनीयं धर्मार्थे तस्मै पित्रे नमो नमः ॥ ४ ॥

तीर्थ स्नान तपो होम जपादि यस्य दर्शनम् ।
महागुरोश् च गुरवे तस्मै पित्रे नमो नमः ॥ ५ ॥

यस्य प्रणाम स्तवनात् कोटिशः पितृ तर्पणम् ।
अश्वमेध शतैस् तुल्यं तस्मै पित्रे नमो नमः ॥ ६ ॥

### ॥ फलश्रुतिः ॥

इदं स्तोत्रं पितृः पुण्यं यः पठेत् प्रयतो नरः ।
प्रत्यहं प्रातरुत्थाय पितृ श्राद्ध दिनेऽपि च ॥ ७ ॥

स्वजन्म दिवसे साक्षात् पितुरग्रे स्थितोऽपि वा ।
न तस्य दुर्लभं किञ्चित् सर्वज्ञतादि वाञ्छितम् ॥ ८ ॥

नाना ऽ पकर्म कृत्वापि यः स्तौति पितरं सुतः ।
स ध्रुवं प्रविधायैव प्रायश्चित्तं सुखी भवेत् ।
पितृः प्रीतिकरो नित्यं सर्व कर्माण्यथार्हति ॥ ९ ॥

---

**॥ इति बृहद् धर्म पुराणे पितृ स्तोत्रं सम्पूर्णम् ॥**